श्रीगणेशायनमः॥अथमंडलदेवता॥इमा द्वौरकोदे॥प्रागुदीच्यायतारे
खाः कुर्यादेकोनविंशतिः॥रंध्रेदुत्रिपदैः कोणैःश्रृंखलापंचभिःपदैः॥
चतुर्विंशत्पदावापिपरिधिर्विंशतिःपदैः॥ मध्येषोडशभिः कोष्ठैःपद्म
मष्टदलंस्मृतं॥श्वेतेदुःश्रृंखलाकृष्णावह्नीनीलेनपूरयेत्॥भद्रारुणा
सितावापिपरिधिःपीतवर्णकः॥बाह्यांतरदलश्वेताकर्णिकापीतवर्णिका॥
परिध्यावेष्टितंपद्मंनाद्यसत्वरजस्तमः॥तन्मध्येस्थापयेद्देवान्बह्म्याद्याश्च
सुरासुरान्॥इतिसर्वतोभद्रपीठं॥ ॥ अथलिंगतोभद्र॥चतुर्विंशति
रालेरव्यारेखाः प्राग्दक्षिणावताः॥कोणेषु श्रृंखलापंचपदापल्यस्तुपा
र्श्वतः॥पदैर्नवभिरालेख्याश्चतुर्भिर्लघुश्रृंखलाः॥लघुपल्यःपदैषड्भिस्त
तोष्टादशभिःपदैः॥कृत्वालिंगानिवाप्यस्युस्त्रयोदशमिरंतरा॥ ॥

नेनाथिद्वयेनेवपीठंकुर्याद्विचक्षणः॥तस्यपादापचपदाद्वारा।ण्य
पितथैवच॥एकाशीतिपदंमध्येपदंस्वस्तिकमुच्यते॥कोणेषु
श्रृंखलाकार्योपदैस्त्रीभिरतःपरं॥पदैश्चतुर्भिर्दिक्षुस्युर्भद्रोष्ये
षांसमेतलः॥एकादशपदापल्यामध्येपद्मंदलान्वितं॥पद्मंनव
पदंद्येनलिंगतोभद्रमुच्यते॥श्रृंखलाः कृष्णवर्णानपत्नीनिलेनपूरये
त्॥रक्तेनश्रृंखलालघ्वीवह्नीपीतेनपूरयेत्॥लिंगानिकृष्णवर्णा
निश्वेतेनाप्यथवापिका॥पीठंस्वपादेश्वेतेनपीठनद्वारपूरणं॥म
ध्येस्युश्रृंखलारक्तावह्नीनिलेनपूरयेत्॥भद्राणिपीतवर्णानिपी

म३०

२

नापंकजकर्णिका॥दलानिश्वेतवर्णानि यद्वा चित्राणि कल्पयेत्॥नि स्रो
रखाबहिःकार्यासीतरक्तासिताक्रमात्॥इति॥अथचतुर्लिंगोद्भवंलिंग॥
रखालषोदशोक्ताचतुर्लिंगसमुद्भवैः॥कोणेदुस्त्रिपदःश्वेतस्त्रिप
दैःकृष्णश्रृंखलाः॥वल्लीसप्तपदानीलाभद्ररक्तंचतुष्पदं॥भद्रपा
र्श्वेमाहरुद्रंकृष्णमष्टदशैःपदैः॥शिवस्यपार्श्वतोवापिकुर्याच्चपादा
श्रितं॥पदमेकंतथापीतंभद्रवाह्यास्तुषोडशाः॥सिरासिश्रृंखलायाश्च
कुर्यात्पीतंपदत्रयं॥लिंगानांस्कंधतःकोष्ठविरतीरक्तवर्णकाः॥परिधिः
पीतवर्णस्तुपदैःषोडशभिस्मृताः॥पदैस्तुनवभिःपश्चाद्रक्तंवप्रंसकर्णि
कं॥अथद्वादशलिंगोद्भवं॥प्रागुदीच्यायतारिखाषट्त्रिंशद्भिःप्रकल्प

येत्पदानिद्वादशशतंपंचविंशतिरेवच खरेंदुस्त्रिपदःकोणेश्रृंख
लाषट्पदैस्मृताः त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः त्रयोद
शपदावापिलिंगमष्टादशंस्मृतं लिंगत्रयस्यषड्भेस्तुशोभाकोष्ठा
श्चतुर्दश तेषामुपरिपंक्तौतुकोष्ठासप्तदशैवतु पूजापंक्तिस्तुविज्ञे
यापरितःपरिकीर्तिता॥पूजापंक्तेस्तुषट्कोष्ठाव्याप्तिस्तस्यायं
परिधिःसचविज्ञेयामंडलंरंतराद्वयोः॥परिध्यंतरकोष्ठाषट्सप्तमोभद्रमा
खेद विशेषश्चात्रविज्ञेयोश्रृंखलाषट्पदाभवेत्॥त्रयोदशपदावल्लीभ
द्रंतुनवभिःपदैः पंचविंशत्पदावापिपरिधिर्वाह्यात्मकः मध्येनवपदंप
त्रंकर्णिकाकेसरान्वितं सत्वरंनवसंख्याकंपरितोमंडलस्यतु त्रयःपरि

MEMORIAL
2

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

३ चयःकार्यास्तन्नद्वाणिकारयेत् सितेंदुःश्वेतवल्लीनीलपत्रकी
र्तिना भद्रंचैवारुणं ज्ञेयंवापीस्याद्धृतकर्णिका लिंगानिकृष्णवर्णानिपार्श्व
तोद्वादशैवतु परिधिःपीतवर्णस्यात्कमलंपंचवर्णकम् ॥ ॥ इतिसर्वतोभ
द्रलिंगतोभद्रादिमंडलानि ॥ ॥अथसर्वतोभद्रमंडलविधिरुच्यते ॥ ॥
शिवेव्रतेविनासर्वयत्नेषानेषु सर्वतोभद्रमंडलंकारयेत् तत्रकारिका
बाहुमात्रोयदावेदीकुर्याल्लक्ष्मृदाबुधैः तद्वेद्यांसर्वतोभद्रमंडलंविलि
खेत्ततः विलिखेत्सर्वतोभद्रंवेदिकायांतुसंदरं ॥ तत्रेवशिवव्रतेषुलिंगतो ३
भद्रंलिखेत् ॥ तन्मध्येस्थापयेद्देवान् ब्रह्मघोश्वस्तरेश्वरान् ॥ ॥अथमं
डलदेवताः ॥ ॥तन्मध्येब्रह्माणं ॥ ॥ ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टु

मध्येब्रह्मावाहनेविनियोगः ॥ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेन
आवः ॥ सबुध्निया उपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः मोब्रह्मन्निहाग
छइहातिष्ठपूतोगृहाणममसंमुखोप्रसन्नोवरदोभव इत्येवंप्रकारेणसर्वत्रदेव
तानांज्ञेयं ॥ ततःउदीचीमारभ्यवायर्वापर्यंतंसोमादयोगाःयष्टतआष्टौलोकपाल्यः
स्थापनीयाः ॥ ततआप्यायस्वसमेतुतेविश्वतःसोमवृष्टियमवावाजस्यसंगथेऽअदित्याज्जि
गर्त्तिभुनेऽपइडानोगायत्रीइडाग्न्योइडानावाहनविनियोगः आमित्वोदेवसवितोमो ५
डानेवार्यपुष्णः ॥ सदावन्भागंमहऽइंद्रोमपुरंदरइंद्रोगायत्रीपूर्वेइंद्रावाहनवि०
इंद्रेविश्वतस्परिहवामहेजनेभ्यः ॥ अस्माकमस्तुकेवलः ४ आग्नेदूतंकाण्वोमेध्या
तिथिरग्निर्गायत्रीआग्नेयोसाग्न्यावाहनेविनियोगः ॥ अग्निदूतंवृणीमहेहोतारंवि

PAGE(S)MISSING

NOT AVAILBLE

FOLIO NO! -
4

श्वेवेद्रसेअस्यय६ज्ञस्यसुक्रतु५यमायसोमेवैवस्वतोयमोनुष्टुप् दक्षिणेयमा
वाहने० यमायसोमेसुनुतयमायजुहुताहविः॥ यमेहियज्ञोगछत्यग्निदूतोअलंकृतः
६ मोषुणोघारःकण्वोनिऋतिर्गायत्री निऋत्यैनिऋतिमावाहनेवि० मोषुणः परापरानि
ऋतिर्दुर्हणा वधीत् पराशरसत्यासहा ७ अतत्यामिशुनःशेपोवरुणस्त्रिष्टुप्
पाशेमेवरुणावास्नेविनियोगः तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेय
जमानोहविर्भिः अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः ८वा
यान्तेवामेदेववायुरनुष्टुप् वायव्यंवाय्वावाहनेविनियोगः वायोयतेहरी
णायुवस्वपोष्याणा उतयातेसहस्रिणीरथउयायातुपाजसा ९ वायुसाममध्ये
अष्टावसवः ममाग्नेमेवरुणावसवस्त्रिष्टुप् वायुसाममध्येअष्टावसवा
वाहनेवि० ममाग्नेवसवोरंतेदयाउरावंतरिक्षेमनियंतशुभ्राः अथाक्ष्यक्षथऊर

त्रयःकृण्वंश्रोतादूतस्यजग्मुषोनोअस्य १० आरुद्रासःस्रावाश्वपूकादआरुद्रा
मरुतोमोमन्यानमध्येएकादशरुद्रावाहनेविनियोगः आरुद्रासईवतःसजो
षसोहिरण्यरथाःसवितायंगतन इयंनाअस्मस्मतिरेतमतिस्तृक्षतेनरिवुलो
दन्यवे ११ योनुमर्त्यःशामादोहदेआदित्यागायत्री इमानेदूमध्येदादशादित्या
वाहनेवि० योनुक्षत्रियाअवआदित्यान्याचिषामहे सूमिळीकोअभिष्ये १२
अश्विनावर्तिरस्मदागोमद्रत्नाहिरण्यवेतं अथोघरथंसमनसानियछतं
१३ ओमासोमधुहोतविश्वेदेवागायत्री अग्नियमंमध्येविश्वेदेवावाहनेवि०
ओमासश्चर्षणीधृतोविश्वेदेवासआगत दाश्वांसोदाशुषःसुतं १४ अभि
त्वेदेवसवितरीशानंवार्याणांसदावन्तमीमहेवयं सनयक्षाअतिद्विषो यमनिर्ऋतिमप्येसनयक्षावास्ने०

मं० ६०

अभिस्येदेवस्यितारमूण्योः कविक्रतुमर्चामि सुम्नसंस्तवाम भिप्रियेमति
कविं दुध्यायस्यामतिं मो अदितिं धृतस्वामनिंहिरण्यपाणिमीमहि सक्रतुः
कृपा सुस्कः १० उषा यंगौ सर्परा ज्ञिः सर्पागायत्री निर्ऋतिर्वरुणमध्ये सर्पा
वाहमि० अप्सरसो गंधर्वाणाम्गाणां चरणे चरन् आयंगौरुशिरक्रमी
दसदन्मातरंपुरः पितरंचप्रयन्स्वः ११ अप्सरसामितरा क्रक्षाप्सरस्
द्याप्रंगो गंधर्वाप्सरसानुष्टुप् वरुणोवायुर्मध्ये गंधर्वाप्सरसआवाहनवि०
अप्सरसो गंधर्वाणाम्गाणां चरणे चरन् केशीकेतस्य विद्वान्त्सखा स्वा
दुर्मदितमः १२ यदक्रंदओ चथ्याद्दीर्घतमास्कक्षीवतस्त्रिष्टुप् ब्रह्मस्कंधमसामम्
ध्येस्कंदावाहनवि० यदक्रंदः प्रथमंजायमानउद्यन्त्समुद्रादुत वापुरीषात्सिंध
नस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वन् १३ तंत्वावयंसनम

षभोवैरा जो नंदीश्वरोनुष्टुप् ब्रह्मसोममध्येनंदीश्वरावाहनेवि० ऋषभंमा
समानां सपत्नानांवृषासहिं हंतारंशत्रूणांकृधिविराजंगोपतिंगवां
१९ कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे० वोचेमशंतमंहृदे २० कुमारंकुमारोम
हाकालस्त्रिष्टुप् तत्रैवमहाकालावाहनेविनि० कुमारंमाता युवतिः समुब्ध
हाबिभर्तिनददातिपित्रे अनीकमस्यनमिनज्जनासः पुरःपश्येतिमिहि
तमरुतो २१ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः विश्वेदेवा अदिते
पंचजनाअदितिर्जातमुतद्यमं २२ तामग्निवर्णांतपसाज्वलंतींवैरोचनीं
कर्मफलेषुजुष्टां० दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमः २३ इदंवि
ष्णुःकाश्यपोमधातिथिर्ऋषिर्विष्णुर्गायत्री ब्रह्मेंद्रमध्येविष्ण्वावाहनेविनियोगः॥ इदंवि
ष्णुर्विचक्रमेत्रीणिपदंसमूढमस्यपांसुरे २४ उदीरतांसंखस्वधात्रिष्टुप्
ब्रह्मात्रिमध्येस्वधावाहनेवि० उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्या
सः॥असंस्मइंयुरुदकान्सुतृप्तालोकंनोधत्तपितरोदधेषु २५ परंमृत्योसंकु
सुकोमध्योरोगात्रिष्टुप् ब्रह्मयममध्यमृत्योरोगावाहनेवि० परंमृत्योअनुप
रेहिपंथांयस्तेस्वइतरोदेवयानाद्चक्षुष्मतेशृण्वतेब्रवीमिमानःप्रजांरीरि
षोमोतवीरान् २६ गणानांत्वागणपतिंहवामहेकविंकवी

नामुपमन्त्रयस्वमे॥ ज्येष्ठराजं ब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदस
दनं २७ ग्रांन्नोदेवीरोबस्रोकेःसिंधूर्द्वीपाआपोगायत्री ब्रह्मवरुणमध्येजपावा
हनेवि० ग्रांन्नोदेवीरभिष्टयआपोभवंतुपीतये ग्रांयोरभिस्रवंतुनः २८
मरुतोयस्यराद्रुगणोगोतमोमरुतोगायत्रीब्रह्मवायुमध्येमरुतावाहनेवि०
मरुतोयस्यहिक्षयेपाथादिवोविमसः॥सेसूगोपातमोजनः २९ स्योना
दृथिकाण्वोमेधातिथिर्भूमिर्गायत्री ब्रह्मणःपादमूलेकर्षिकाभ्यःपृथि
व्यावाहनेवि० स्योनापृथिविभवानृक्षरानिवेशनी॥यच्छानःशर्मसप्रथाः
३० इंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या
असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ३१ धाम्नोधा

म्नोगोतमोवामदेवःसप्तसागरानुष्टुप् तत्रैवसप्तसागरावाहनेवि०धाम्नो=
धाम्नोराजन्नितोवरुणोमुंचयदापोअभ्नियावरुणेतिग्रापामेहतोवरुणो
मुंच॥मयिवापोमाषधीर्हिंसीरतोविश्वस्यचाभुस्त्रोवरुणोमुंच ३२
तदुपरिमेरुंनाममेत्रेणर्ष्यत्र्यंत्रयेत्र मेरवेनमःमेरुआवाहया॥ततोमंडलाद्बहिः
सोमादिसंनिधौआयुधान्यावाहयेत्॥सोमस्समीपेगदां॥इंद्रानलसमीपेत्रिशू
लं॥इंद्रसमीपेवज्रं॥अग्निसमीपेशक्तिं॥यमसमीपेदंडं॥निर्ऋतिसमीपेख
ड्गं॥वरुणसमीपेपाशं॥वायुसमीपेअंकुशं॥तद्विष्णोरुरुक्रमोतमायनमःगो
तमंआवाहयामि॥ईशेग्रांयभरद्वाजं॥पूर्वेविश्वामित्रं॥आग्नेयेंकश्यपं॥
दक्षिणेजमदग्निं॥नैर्ऋत्येवसिष्ठं॥पश्चिमेअत्रिं॥वायव्येअरुंधतीं॥तद्वि
ष्णोर्वादिक्रमेण॥ऐंद्रीं कौमारीं ब्राह्मीं वाराहीं चामुंडां वैष्णवीं मदेश्वरीं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मं० दे० वैनायकी ॥ ॥ इत्यष्टोत्तरशतयः ॥ प्रतिष्ठाप्य प्रत्येकं सदक्षापूजयेत् ॥ इति मं
उल्कदेवताः ॥ ततः स्तौ अग्न्युत्तारणं ॥ अस्यामूर्तौ आधानादि दोषपरिहारार्थं
९ अग्न्युत्तारणदेवतासान्निध्यार्थं प्राणप्रतिष्ठां करिष्ये ॥ ॐ नमः पठेत् अग्निः सप्त
वाजंभरं ददात्यग्निवीरं श्रुत्यं कर्मनिष्ठां ॥ अग्नीरोदसीविचरत्समंजे भाग्नि
नारीवीरकुक्षिपुरंधिं ॥ अग्नेरहसःसमिदस्तु भद्रा अग्निमहीरोदसी आ
विवेश ॥ अग्निरंकोदयत्सम्स्वग्निर्वेत्राणिदयतेपुरूणि ॥ अग्निर्हि
यंजरतः कर्णमावाग्निरद्योनिरदह्जरूथं ॥ अग्निरत्रिंघर्मउरुष्यदत्रि
रग्निरमेधंप्रजयासुजत्सं ॥ अग्निर्दोद्रविणंवीरपत्र्याअग्निर्ऋषिय:सह
स्रनीति ॥ अग्निर्दिविद्रव्यमाततानाग्निंधीमानिबिभ्रतापुरुत्रा ॥ अग्निमुक्थै
र्ऋषयोविदयंतेग्निंनरोयामेनिबाधितासः ॥ अग्निंवयोअंतरिक्षेपतंतो